# WEST BENGAL STATE UNIVERSITY

B.A. Honours 5th Semester Examination, 2022-23

## SANADSE01T-SANSKRIT (DSE1/2)

### VEDA & VYAKARANA

Time Allotted: 2 Hours Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

सर्वेषां प्रश्नानाम् उत्तरं संस्कृतभाषया देवनागरलिप्या च देयम्।

क-विभागः

1. अधोलिखितेषु प्रश्नेषु यथेच्छं पञ्च प्रश्नाः समाधेयाः। 2×5 = 10

(क) यजुर्वेदस्य कति विभागाः सन्ति ? रुद्रस्तुतिः कस्मिन् वेदे कस्मिन् अध्याये च वर्तते ?

(ख) रुद्रशब्दस्य किं निर्वचनम् ? कश्च रुद्रशब्दस्य अर्थः ?

(ग) 'अपापकाशिनी' इति पदस्य कोऽर्थः ? पदमिदं कमुद्दिश्य प्रयुक्तम् ?

(घ) 'प्रथमो दैव्यो भिषक्'– इत्यस्य वाक्यस्य कोऽर्थः ? अत्र कस्य उल्लेखः क्रियते ?

(ङ) रुद्रदेवः 'ताम्रः' 'अरुणश्चे'ति कथमुच्यते ?

(च) 'नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे'– इत्यत्र 'नीलग्रीवाय' 'सहस्राक्षाय' चेति पदयोः कः अर्थः ?

(छ) 'यातुधान्योऽधराचीः परासुव'– अस्मिन् मन्त्रे रुद्रं निकषा का प्रार्थना क्रियते ?

ख-विभागः

2. अधोलिखितेषु प्रश्नेषु यथेच्छमेकस्य प्रश्नस्य उत्तरं देयम्। 10×1 = 10

(क) मनुमत्स्यकथा कुत्र वर्तते ? अस्याः कथायाः वर्णनं कृत्वा वैदिकसाहित्येषु तस्याः गुरुत्वं प्रतिपादयत। 2+8

(ख) 'मत्स्य एव मत्स्यं गिलति'– केन कमुद्दिश्य किमर्थं च उक्तम् ? प्लावनकथामाधारीकृत्य वाक्यस्यास्य तात्पर्यं विवृणुत। 1+1+2+6

ग-विभागः

3. अधः प्रदत्तेषु विषयेषु यथेच्छमेकमाश्रित्य टीकां लिखत। 5×1 = 5

(क) मुरजित्पादनखदीधितिदीपिकाः।

(ख) कविसूक्तिरसायनानि।

(ग) मुक्तिमार्गप्रदर्शिकाः।

अथवा

अधः प्रदत्तेषु श्लोकेषु यथेच्छमेकः श्लोको व्याख्येयः। 5×1 = 5

(क) अग्निं पृणाति पृणति द्विजदेवताश्च
प्रीणाति बान्धवजनानतिथीन् पृणोति।
यः प्रीयते प्रणयिषु प्रयते च भृत्यान्
यं प्राययन्ति कविसूक्तिरसायनानि॥

(ख) यो वीणाति जयश्रियं रणमुखे धर्मं वृणीतेऽध्वरे
तेजोभिर्जगदावृणोति वरति ज्ञातीन् यथार्हैर्धनैः।
सत्कीर्तिञ्च वृणाति यो वरयति क्षेमं यशो वीयते
युद्धे वारयति द्विषो निवरते नित्यं प्रियोपद्रवम्॥

(ग) यस्य पृथ्वी प्रसूतेऽर्थं धर्ममर्थः प्रसूयते।

### घ-विभागः

4. अधो दत्तेषु विषयेषु <u>यथेच्छमेकमाश्रित्य</u> टिप्पनीं लिखत। 5×1 = 5

(क) मातृदेवो भव।
(ख) महः।
(ग) ओमिति ब्रह्म।

**अथवा**

अधोलिखितेषु उपनिषद्वाक्येषु <u>यथेच्छमेकं</u> व्याख्येयम्। 5×1 = 5

(क) त्वमेव प्रत्यक्षं ब्रह्मासि।
(ख) अमृतस्य देव धारणो भूयासम्। शरीरं मे विचर्षणम्। जिह्वा मे मधुमत्तमा। कर्णाभ्यां भूरि विश्रुवम्।
(ग) सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः।

### ङ-विभागः

5. <u>यथेच्छमेकस्य</u> प्रश्नस्योत्तरं विधेयम्। 10×1 = 10

(क) किं नाम नाभानेदिष्ठम् ? नाभानेदिष्ठोपाख्यानं कस्य ब्राह्मणस्य कस्मिन् अध्याये समुपलभ्यते ? उपाख्यानेऽस्मिन् उपलभ्यमानस्य प्राचीनभारतीयसमाजजीवनस्य आलेख्यम् विरच्यताम्। 1+1+1+7

(ख) "यद्व एतत्सहस्रं सत्रपरिवेषणं तन्मे स्वर्यन्तो दत्तेति"– अत्र वक्ता कः ? कमुद्दिश्य वक्ता एवमुक्तवान् ? उपाख्यानस्य प्रतिपाद्यं तात्पर्यं च समुल्लिख्य समासेन एकः प्रबन्धो विरच्यताम्। 1+1+8

### च-विभागः

6. अधः प्रदत्तेषु पदेषु यथेच्छं <u>द्वयोः</u> पदयोः रूपसाधनं कुरुत। 5×2 = 10
कोकिला, गन्त्री, विदुषी, त्रिफली, नारी।

**अथवा**

यथेच्छं <u>सूत्रद्वयं</u> व्याख्येयम्। 5×2 = 10

(क) अजाद्यतष्टाप्।
(ख) उगितश्च।
(ग) द्विगोः।
(घ) वोतो गुणवचनात्।

——×——